॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय २८

सुमालिनं हतं दृष्ट्वा वसुना भस्मसात्कृतम् ।
विद्रुतं चापि स्वं सैन्यं लक्षयित्वार्दितं शरैः ॥ १॥

ततः स बलवान्क्रुद्धो रावणस्य सुतो युधि ।
निवर्त्य राक्षसान्सर्वान्मेघनादो व्यतिष्ठत ॥ २॥

स रथेनाग्निवर्णेन कामगेन महारथः ।
अभिदुद्राव सेनां तां वनान्यग्निरिव ज्वलन् ॥ ३॥

ततः प्रविशतस्तस्य विविधायुधधारिणः ।
विदुद्रुवुर्दिशः सर्वा देवास्तस्य च दर्शनात् ॥ ४॥

न तत्रावस्थितः कश्चिद्रणे तस्य युयुत्सतः ।
सर्वानाविध्य वित्रस्तान्दृष्ट्वा शक्रोऽभ्यभाषत ॥ ५॥

न भेतव्यं न गन्तव्यं निवर्तध्वं रणं प्रति ।
एष गच्छति मे पुत्रो युद्धार्थमपराजितः ॥ ६॥

ततः शक्रसुतो देवो जयन्त इति विश्रुतः ।
रथेनाद्भुतकल्पेन सङ्ग्राममभिवर्तत ॥ ७॥

ततस्ते त्रिदशाः सर्वे परिवार्य शचीसुतम् ।
रावणस्य सुतं युद्धे समासाद्य व्यवस्थितः ॥ ८॥

तेषां युद्धं महदभूत्सदृशं देवराक्षसाम् ।
कृते महेन्द्रपुत्रस्य राक्षसेन्द्रसुतस्य च ॥ ९॥

ततो मातलिपुत्रे तु गोमुखे राक्षसात्मजः ।
सारथौ पातयामास शरान्काञ्चनभूषणान् ॥ १०॥

शचीसुतस्त्वपि तथा जयन्तस्तस्य सारथिम् ।
तं चैव रावणिं क्रुद्धः प्रत्यविध्यद्रणाजिरे ॥ ११॥

ततः क्रुद्धो महातेजा रक्षो विस्फारितेक्षणः ।
रावणिः शक्रपुत्रं तं शरवर्षैरवाकिरत् ॥ १२॥

ततः प्रगृह्य शस्त्राणि सारवन्ति महान्ति च ।
शतघ्नीस्तोमरान्प्रासान्गदाखड्गपरश्वधान् ।
सुमहान्त्यद्रिशृङ्गाणि पातयामास रावणिः ॥ १३॥

ततः प्रव्यथितो लोकाः सञ्जज्ञे च तमो महत् ।
तस्य रावणपुत्रस्य तदा शत्रूनभिघ्नतः ॥ १४॥

ततस्तद्दैवतबलं समन्तात्तं शचीसुतम् ।
बहुप्रकारमस्वस्थं तत्र तत्र स्म धावति ॥ १५॥

नाभ्यजानंस्तदान्योन्यं शत्रून्वा दैवतानि वा ।
तत्र तत्र विपर्यस्तं समन्तात्परिधावितम् ॥ १६॥

एतस्मिन्नन्तरे शूरः पुलोमा नाम वीर्यवान् ।
दैतेयस्तेन सङ्गृह्य शचीपुत्रोऽपवाहितः ॥ १७॥

गृहीत्वा तं तु नप्तारं प्रविष्टः स महोदधिम् ।
मातामहोऽर्यकस्तस्य पौलोमी येन सा शची ॥ १८॥

प्रणाशं दृश्य तु सुरा जयन्तस्यातिदारुणम् ।
व्यथिताश्चाप्रहृष्टाश्च समन्ताद्विप्रदुद्रुवुः ॥ १९॥

रावणिस्त्वथ संहृष्टो बलैः परिवृतः स्वकैः ।
अभ्यधावत देवांस्तान्मुमोच च महास्वनम् ॥ २०॥

दृष्ट्वा प्रणाशं पुत्रस्य रावणेश्चापि विक्रमम् ।
मातलिं प्राह देवेन्द्रो रथः समुपनीयताम् ॥ २१॥

स तु दिव्यो महाभीमः सज्ज एव महारथः ।
उपस्थितो मातलिना वाह्यमाना मनोजवः ॥ २२॥

ततो मेघा रथे तस्मिंस्तडिद्वन्तो महास्वनाः ।
अग्रतो वायुचपला गच्छन्तो व्यनदंस्तदा ॥ २३॥

नानावाद्यानि वाद्यन्त सुतयश्च समाहिताः ।
ननृतुश्चाप्सरःसङ्घाः प्रयाते वासवे रणम् ॥ २४॥

रुद्रैर्वसुभिरादित्यैः साध्यैश्च समरुद्गणैः ।
वृतो नानाप्रहरणैर्निर्ययौ त्रिदशाधिपः ॥ २५॥

निर्गच्छतस्तु शक्रस्य परुषं पवनो ववौ ।

भास्करो निष्प्रभश्चासीन्महोल्काश् च प्रपेदिरे ॥ २६ ॥

एतस्मिन्नन्तरे शूरो दशग्रीवः प्रतापवान् ।
आरुरोह रथं दिव्यं निर्मितं विश्वकर्मणा ॥ २७ ॥

पन्नगैः सुमहाकायैर्वेष्टितं लोमहर्षणैः ।
येषां निश्वासवातेन प्रदीप्तमिव संयुगम् ॥ २८ ॥

दैत्यैर्निशाचरैः शूरै रथः सम्परिवारितः ।
समराभिमुखो दिव्यो महेन्द्रमभिवर्तत ॥ २९ ॥

पुत्रं तं वारयित्वासौ स्वयमेव व्यवस्थितः ।
सोऽपि युद्धाद्विनिष्क्रम्य रावणिः समुपाविशत् ॥ ३० ॥

ततो युद्धं प्रवृत्तं तु सुराणां राक्षसैः सह ।
शस्त्राभिवर्षणं घोरं मेघानामिव संयुगे ॥ ३१ ॥

कुम्भकर्णस्तु दुष्टात्मा नानाप्रहरणोद्यतः ।
नाज्ञायत तदा युद्धे सह केनाप्ययुध्यत ॥ ३२ ॥

दन्तैर्भुजाभ्यां पद्भ्यां च शक्तितोमरसायकैः ।
येन केनैव संरब्धस्ताडयामास वै सुरान् ॥ ३३ ॥

ततो रुद्रैर्महाभागैः सहादित्यैर्निशाचरैः ।
प्रयुद्धस्तैश्च सङ्ग्रामे कृत्तः शस्त्रैर्निरन्तरम् ॥ ३४ ॥

ततस्तद्राक्षसं सैन्यं त्रिदशैः समरुद्गणैः ।
रणे विद्रावितं सर्वं नानाप्रहरणैः शितैः ॥ ३५ ॥

के चिद्विनिहताः शस्त्रैर्वेष्टन्ति स्म महीतले ।
वाहनेष्ववसक्ताश्च स्थिता एवापरे रणे ॥ ३६ ॥

रथान्नागान्खरानुष्ट्रान्पन्नगांस्तुरगांस्तथा ।
शिंशुमारान्वराहांश्च पिशाचवदनांस्तथा ॥ ३७ ॥

तान्समालिङ्ग्य बाहुभ्यां विष्टब्धाः के चिदुच्छ्रिताः ।
देवैस्तु शस्त्रसंविद्धा मम्रिरे च निशाचराः ॥ ३८ ॥

चित्रकर्म इवाभाति स तेषां रणसम्प्लवः ।
निहतानां प्रमत्तानां राक्षसानां महीतले ॥ ३९ ॥

शोणितोदक निष्यन्दाकङ्कगृध्रसमाकुला ।
प्रवृत्ता संयुगमुखे शस्त्रग्राहवती नदी ॥ ४० ॥

एतस्मिन्नन्तरे क्रुद्धो दशग्रीवः प्रतापवान् ।
निरीक्ष्य तद्बलं सर्वं दैवतैर्विनिपातितम् ॥ ४१ ॥

स तं प्रतिविगाह्याशु प्रवृद्धं सैन्यसागरम् ।
त्रिदशान्समरे निघ्नञ्शक्रमेवाभ्यवर्तत ॥ ४२ ॥

ततः शक्रो महच्चापं विस्फार्य सुमहास्वनम् ।
यस्य विस्फारघोषेण स्वनन्ति स्म दिशो दश ॥ ४३ ॥

तद्विकृष्य महच्चापमिन्द्रो रावणमूर्धनि ।
निपातयामास शरान्पावकादित्यवर्चसः ॥ ४४ ॥

तथैव च महाबाहुर्दशग्रीवो व्यवस्थितः ।
शक्रं कार्मुकविभ्रष्टैः शरवर्षैरवाकिरत् ॥ ४५ ॥

प्रयुध्यतोरथ तयोर्बाणवर्षैः समन्ततः ।
नाज्ञायत तदा किं चित्सर्वं हि तमसा वृतम् ॥ ४६ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com